.. 15. mausalaparva Kumbhaghonam Edition ..
॥ १५. मौसलपर्व ॥

मौसलपर्व - अध्याय ००१
॥ श्रीः ॥
१५.१. अध्यायः १

Mahabharata - Mausala Parva - Chapter Topics
प्रजापालनेन निजनगरे भ्रातृभिः सह सुखनिवासिना युधिष्ठिरेण
कदाचनाशुभसूचकोत्पातदर्शनम् ॥ १ ॥
ततः कालन्तरे सबलकृष्णानां सर्वयादवानां परस्परं
मौसलप्रहारेणि निश्शेषनिधनश्रवणम् ॥ २ ॥

Mahabharata - Mausala Parva - Chapter Text

श्रीवेदव्यासाय नमः ।
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ १५-१-१ (९६९१३)
वैशम्पायन उवाच। १५-१-१क्ष् (८०२१)
षट्त्रिंशे त्वथ् संप्राप्ते वर्षे कौरवन्दनः ।
ददर्श विपरीतानि निमित्तानि युधिष्ठिरः ॥ १५-१-१ (९६९१४)
ववुर्वाताश्च निर्घाता रूक्षाः शर्करवर्षिणः ।
अपसव्यानि शकुना मण्डलानि प्रचक्रिरे ॥ १५-१-२ (९६९१५)
प्रत्यगूहुर्महानद्यो दिशो नीहारसंवृताः ।
उल्काश्चाङ्गारवर्षिण्यः प्रापतन्गगनाद्भुवि ॥ १५-१-३ (९६९१६)
आदित्यो रजसा राजन्समवच्छन्नगनाद्भुवि ॥
विरश्मिरुदये नित्यं कबन्धैः समलङ्कृतः ॥ १५-१-४ (९६९१७)
परिवेषाश्च दृश्यन्ते दारुणाश्च द्रसूर्ययोः ।
त्रिवर्णाः श्यामरुक्षान्तास्तथा भस्मारुणप्रभाः ॥ १५-१-५ (९६९१८)
एते चान्ये च बहव उत्पाता भयसंसिनः ।
दृश्यन्ते जगतो नाथ दिवमारोढुमिच्छति ॥ १५-१-६ (९६९१९)
ग्यस्य प्रसादाद्धर्मोऽयं कृते यद्वत्कलावपि ।
पाण्डवाश्च महाभाग युक्तास्तु यशसाऽनघ ॥' १५-१-७ (९६९२०)

कस्य चित्त्वथ कालस्य कुरुराजो विशङ्कितः ।
शुश्राव वृष्णिचक्रस्य मुसलोत्सादनं कृतम् ॥ १५-१-८ (९६९२१)
विमुक्तं वासुदेवं च श्रुत्वा रामं च पाण्डवः ।
समानीयाब्रवीद्भ्रातॄन्किं करिष्याम इत्युत ॥ १५-१-९ (९६९२२)
परस्परं समासाद्य ब्रह्मदण्डबलात्कृतान् ।
वृष्णिन्विनष्टास्ते श्रुत्वा व्यथिताः पाण्डवा भृशम् ॥ १५-१-१० (९६९२३)
निधनं वासुदेवस्य समुद्रस्येव शोषणम् ।
वीरा न श्रद्दधुस्तस्य विनाशं शार्ङ्गधन्वनः ॥ १५-१-११ (९६९२४)
मौसलं ते समाश्रित्य दुःखशोकसमन्विताः ।
विषण्णा हतसंकल्पाःकि पाण्डवाः समुपाविशन् ॥ ॥ १५-१-१२ (९६९२५)

इति श्रीमन्महाभारते मौसलपर्वणि प्रथमोऽध्यायः ॥ १ ॥
Mahabharata - Mausala Parva - Chapter Footnotes

७-१-१२ मौसलं मुसलकृतं कदनं समाश्रित्य मनसि धृत्वा ॥

मौसलपर्व - अध्याय ००२
॥ श्रीः ॥
१५.२. अध्यायः २

Mahabharata - Mausala Parva - Chapter Topics
वैशम्पायनेन जनमेजयंपति यादवानां मौसलेन
निधनप्रकारकथनारम्भः ॥ १ ॥
कदाचन विश्वामित्राकदिमहर्षिषु द्वारकः मागतेषु कैश्चन
यादवैः सांबस्य स्त्रीवेषपरिकल्पनेन मुनीन्प्रति गर्भिणीयं
किंरूपमपत्यं प्रसविष्यतीति प्रश्नः ॥ २ ॥
ततो रुष्टैर्महर्षिभिः स्वकुलविनाशकमायसं मुसलं प्रसविष्यतीति
शापदानम् ॥ ३ ॥
ततः परेथुः सांवेन मुसले प्रसूते भीतैस्तै राजाज्ञया तस्य
चूर्णकरणेन समुद्र प्रक्षेपणम् ॥ ४ ॥

Mahabharata - Mausala Parva - Chapter Text

जनमेजय उवाच ।
कथं विनष्टा भगवन्नन्धका वृष्णिभिः सह ।
पश्यतो वासुदेवस्य भोजश्चैवक महारथाः ॥ १५-२-१ (९६९२६)

वैशम्पायन उवाच। १५-२-२क्ष् (८०२२)
षट्त्रिंशेऽथ ततो वर्षे वृष्णीनामनयो महान् ।
अन्योन्यं मुसलैस्ते तु निजघ्नुः कालचोदिताः ॥ १५-२-२ (९६१२७)
जनमेजय उवाच। १५-२-३क्ष् (८०२३)
केनानुशप्तास्ते वीराः क्षयं वृष्ण्यन्धका गताः ।
भोजाश्च द्विजवर्य त्वं विस्तरेण वदस्व मे ॥ १५-२-३ (९६१२८)
वैशम्पायन उवाच। १५-२-४क्ष् (८०२४)
विश्वामित्रं च कण्वं च नारदं च तपोधनम् ।
सारणप्रमुखा वीरा ददृशुर्द्वारकां गतान् ॥ १५-२-४ (९६१२९)
ते वै सांबं पुरस्कृत्य भूषयित्वा स्त्रियं यथा ।
अब्रुवन्नुपसङ्गम्य् दैवदण्डनिपीडिताः ॥ १५-२-५ (९६१३०)
इयं स्त्री पुत्रकामस्य बभ्रोरमिततेजसः ।
ऋषयः साधु जानीत किमियं जनयिष्यति ॥ १५-२-६ (९६१३१)
इत्युक्तास्ते तदा राजन्विप्रलम्भप्रधर्षिताः ।
प्रत्यबुवंस्तान्मुनयो यत्तच्छृणु नराधिप ॥ १५-२-७ (९६१३२)
वृष्ण्यन्धकविनाशाय मुसलं घोरमायसम् ।
वासुदेवस्य दायादः सांबोऽयं जनयिष्यति ॥ १५-२-८ (९६१३३)
येन यूयं सुदुर्वृत्ता नृशंसा जातमन्यवः ।
उच्छेत्तारः कुलं कृत्स्नमृते रामजनार्दनौ ॥ १५-२-९ (९६१३४)
समुद्रं यास्यति श्रीमांस्त्यक्त्वा देहं हलायुधः ।
जरःकृष्णं महात्मानं शयानं भुवि भेत्स्यति ॥ १५-२-१० (९६१३५)
इत्यब्रुवंस्ततो राजन्प्रलब्धास्तैर्दुरात्मभिः ।
मुनयः क्रोधरक्ताक्षाः समीक्ष्याथ परस्परम् ।
तथोक्त्वा मुनयस्ते तु यथागतमथो ययुः ॥ १५-२-११ (९६१३६)
अथाब्रवीत्तदा वृष्णीञ्श्रुत्वैतन्मधुसूदनः ।
अन्तज्ञो मतिमांस्तस्य भवितव्यं तथेति तान् ॥ १५-२-१२ (९६१३७)
एवमुक्त्वा हृषीकेशः प्रविवेश पुरं तदा ।
कृतान्तमन्यथा नैच्छत्कर्तुं स जगतः प्रभुः ॥ १५-२-१३ (९६१३८)
श्वोभूतेऽथ ततः सांबो मुसलं तदसूकत वै ।
येन वृष्णन्धककुले पुरुषा भस्मसात्कृताः ॥ १५-२-१४ (९६१३९)
वृष्ण्यन्धकविनाशाय किंकरप्रतिमं महत् ।
असूत सापजं घोरं तच्च राज्ञे न्यवेदयन् ॥ १५-२-१५ (९६१४०)
विषण्णरूपस्तद्राजा सूक्ष्मं चूर्णमकारयत् ।
तच्चूर्णं सागरे चापि प्राक्षिपन्पुरुषा नृप ॥ १५-२-१६ (९६१४१)
अघोषयंश्च नगरे वचनादाहुकस्य ते ।
जनार्दनस्य रामस्य बभ्रोश्चैव महात्मनः ॥ १५-२-१७ (९६१४२)

अद्यप्रभृति सर्वेषु वृष्ण्यन्धककुलेष्विह ।
सुरासवो न कर्तव्यः, सर्वैर्नगरवासिभिः ॥ १५-२-१८ (९६९४३)
यश्च नो विदितं कुर्यात्पेयं कश्चिन्नरः क्वचित् ।
जीवन्स शूलमारोहेत्स्वयं कृत्वा सबान्धवः ॥ १५-२-१९ (९६९४४)
ततो राजभयात्सर्वे नियमं चक्रिरे तदा ।
नराः साशनमाज्ञाय तस्य राज्ञो महात्मनः ॥ ॥ १५-२-२० (९६९४५)

इति श्रीमन्महाभारते मौसलपर्वणि द्वितीयोऽध्यायः ॥ २ ॥
Mahabharata - Mausala Parva - Chapter Footnotes

७-२-२ मुसलैरेरकालग्नैर्मुसलकणैः ॥
७-२-१० जरा कृष्णमिति झ पाठः । जरानामा कश्चित्कैवर्तः ॥
७-२-१५ किङ्करो यमदूतस्तत्तुल्यम् ॥
७-२-१९ खयंकृत्वा स्वयंकर्ता ॥

मौसलपर्व - अध्याय ००३
॥ श्रीः ॥
१५.३. अध्यायः ३

Mahabharata - Mausala Parva - Chapter Topics
द्वारकायां नानोत्पातप्रादुर्भावः ॥ १ ॥
तत्तद्दर्शनात्कृष्णेन गान्धारीशापदानानुस्मरेण तस्य
सत्यताचिकीर्षया भटैः सर्ववृष्ण्यादीनां तीर्थयात्रोद्घोषणम्
॥ २ ॥

Mahabharata - Mausala Parva - Chapter Text

वैशंपाय उवाच ।
एवं प्रयतमानानां वृष्णीनामन्धकैः सह ।
कालो गृहाणि सर्वेषां परिचक्राम नित्यशः ॥ १५-३-१ (९६९४६)
करालो विकटो मुण्डः पुरुषः कृष्णपिङ्गलः ।
गृहाण्यावेक्ष्य वृष्णीनां नादृश्यतं पुनः क्वचित् ॥ १५-३-२ (९६९४७)
तमघ्नन्त महेष्वासाः शरैः शतसहस्रशः ।
न चाशक्यत वेद्धुं स सर्वभूतात्ययस्तदा ॥ १५-३-३ (९६९४८)
उत्पेदिरे महावाता दारुणाश्च दिनेदिने ।
वृष्ण्यन्धकविनाशाय बहवो रोमहर्षणाः ॥ १५-३-४ (९६९४९)

विवृद्धमूषिका रथ्या विभिन्नमणिकास्तथा ।
केशा नखाश्च सुप्तानामद्यन्ते मूषिकैर्निशि ॥१५-३-५ (९६९५०)
चीचीकूचीति वाशन्ति शारिका वृष्णिवेश्मसु ।
नोपशाम्यति शब्दस्य सदिवारात्रमेव हि ॥१५-३-६ (९६९५१)
अन्वकुर्वन्नुलूकानां सारसा विरुतं तथा ।
अजाः शिवानां विरुतमन्वकुर्वत भारत ॥१५-३-७ (९६९५२)
पाण्डुरा रक्तपादाश्च विहगाः कालचोदिताः ।
वृष्ण्यन्धकानां गेहेषु कपोता व्यचरंस्तदा ॥१५-३-८ (९६९५३)
व्यजायन्त खरा गोषु करभाश्वतरीषु च ।
शुनीष्वपि बिडालाश्च मूषिका नकुलीषु च ॥१५-३-९ (९६९५४)
नापत्रपन्त पापानि कुर्वन्तो वृष्णयस्तदा ।
प्रार्दयन्ब्राह्मणांश्चापि पितॄन्देवांस्तथैव च ॥१५-३-१० (९६९५५)
गुरूंश्चाप्यवमन्यन्ते न तु रामजनार्दनौ ।
पत्न्यः पतीनुच्चरन्ति पत्नीश्चक पतयस्तथा ॥१५-३-११ (९६९५६)
विभावसुः प्रज्वलितो वामं विपरिवर्तते ।
नीललोहितमञ्जिष्ठा विसृजन्नर्चिषः पृथक् ॥१५-३-१२ (९६९५७)
उदयास्तमये नित्यं पुर्यां तस्यां दिवाकरः ।
व्यदृश्यतासकृत्पुंभिः कबन्धैः परिवारितः ॥१५-३-१३ (९६९५८)
महानसेषु सिद्धेषु संस्कृतेऽतीवि भारत ।
आहार्यमाणे कृमयो व्यदृश्यन्त सहस्रशः ॥१५-३-१४ (९६९५९)
पुण्याहे वाच्यमाने तु जपत्सु च महात्मसु ।
अभिधावन्तः श्रूयन्ते न चादृश्यत कश्चन ॥१५-३-१५ (९६९६०)
परस्परं च नक्षत्रं हन्यमानं पुनःपुनः ॥
ग्रहैरपश्यन्सर्वे ते नात्मनस्तु कथञ्चन ॥१५-३-१६ (९६९६१)
नदन्तं पाञ्चिजन्यं च वृष्णन्धकनिवेशने ।
समन्तात्पर्यवाशन्त रासभा दारुणस्वराः ॥१५-३-१७ (९६९६२)
एवं पश्यन्हृषिकेशः संप्राप्तं कालपर्ययम् ।
त्रयोदश्याममावास्यां तान्दृष्ट्वा प्राब्रवीदिदम् ॥१५-३-१८ (९६९६३)
चतुर्दशी पञ्चदशी कृतेयं राहुणा पुनः ।
प्राप्ते वै भारते युद्धे प्राप्ता चाद्य क्षयाय नः ॥१५-३-१९ (९६९६४)
विमृशन्नेव कालं तं परिचिन्त्य जनार्दनः ।
मेने प्राप्तं स षट्त्रिंशं वर्षं वै केशिसूदनः ॥१५-३-२० (९६९६५)
पुत्रशोकाभिसंतप्ता गान्धारी हतबान्धवा ।
यदनुव्याजहारार्ता तदिदं समुपागमत् ॥१५-३-२१ (९६९६६)
इदं च तदनुप्राप्तमब्रवीद्यद्युधिष्ठिरः ।
पुरा व्यूढेष्वनीकेषु दृष्ट्वेत्पातान्सुदारुणान् ॥१५-३-२२ (९६९६७)

इत्युक्त्वा वासुदेवस्तु चिकीर्षुः सत्यमेव तत् ।
आज्ञापयामास तदा तीर्थयात्रामरिंदमः ॥ १५-३-२३ (९६९६८)
अघोषयन्त पुरुषास्तत्र केशवशासनात् ।
तीर्थयात्रा समुद्रे वः कार्येति पुरुषर्षभाः ॥ ॥ १५-३-२४ (९६९६९)

इति श्रीमन्महाभारते मौसलपर्वणि तृतीयोऽध्यायः ॥
Mahabharata - Mausala Parva - Chapter Footnotes

७-३-१ कालः कपोतोलूकादिरूपेण ॥
७-३-२ स एव क्वचित्करालादिरूपोऽदृस्यत क्वचिन्न । आवेक्ष्य परिक्रामन्निति शेषः ॥
७-३-३ सर्वभूतानां अत्ययो नाशो यस्मात् ॥
७-३-५ मणिका मृत्पात्राणि ॥
७-३-११ उच्चरन्ति वञ्चयन्ति ॥
७-३-१४ आहार्यमाणे अन्ने। ७-३-१६ स्वनक्षत्रादर्शनमपि स्वमृत्युसूचकमित्यर्थः। ।
७-३-१८ एवमिति । त्रयोदशदिवसः कृष्णपक्षोऽभूदित्यर्थः ॥
७-३-१९ एवं सत्यग्रिमपक्षए वृद्ध्या भाव्यं तन्न जातं प्रत्युतैकातिथिः क्षीणा तत्र ग्रहणं चँ जातमित्याह चतुर्दशीति ॥

मौसलपर्व - अध्याय ००४
॥ श्रीः ॥
१५.४. अध्यायः ४

Mahabharata - Mausala Parva - Chapter Topics
द्वारकायां वृष्ण्यन्तकादिभिरनर्थसूचकदुस्स्वप्नानुभवः ॥ १ ॥
ततः कृष्णाज्ञाया सस्त्रीबालवृद्धैः प्रभासक्षेत्रगमनम् ॥ २ ॥
तत्र नृत्तगानादिमहोत्सवानुभवपूर्वकं मद्यादिपानम् ॥ ३ ॥
तत्र सभायां सात्यकिना स्यमन्तकमणिहरणादिमर्मोद्धाटनपूर्वकं कृतवर्मगर्हणम् ॥ ४ ॥
मणिवृत्तान्तश्रवणखिन्नक्कसत्यभामामनःप्रसादनाय सात्यकिना खड्गेन कृतवर्मणः सिरश्छेदनम् ॥ ५ ॥
ततः कृतवर्मसात्यकिपक्षीयैर्मौसकतृचैः परस्परप्रहारेण परस्परमारणम् ॥ ६ ॥

Mahabharata - Mausala Parva - Chapter Text

वैशम्पायन उवाच ।
काली स्त्री पाण्डुरैर्दन्तैः प्रविश्य हसती निशि ।
स्त्रियः स्वप्नेषु मुष्णन्ती द्वारकां परिधावति ॥ १५-४-१ (९६९७०)
अग्निहोत्रनिकेतेषु वास्तुमध्येषु वेश्मसु ।
वृष्ण्यन्धकानखादन्त स्वप्ने गृध्रा भयानकाः ॥ १५-४-२ (९६९७१)
अलङ्काराश्च च्छत्रं च ध्वजाश्च कवचानि च ।
ह्रियमाणान्यदृश्यन्त रक्षोभिः सुभयानकैः ॥ १५-४-३ (९६९७२)
तच्चाग्निदत्तं कृष्णस्य वज्रनाभमयोमयम् ।
दिवमाचक्रमे चक्रं वृष्णीनां पश्यतां तदा ॥ १५-४-४ (९६९७३)
युक्तं रथं दिव्यमादित्यवर्णं
हयाऽहरन्पश्यतो दारुकस्य ।
ते सागरस्योपरिष्टादगच्छ-
न्मनोजवाश्चतुरो वाजिमुख्याः ॥ १५-४-५ (९६९७४)
तालः सुपर्णश्च महाध्वजौ तौ
सुपूजितौ रामजनार्धनाभ्याम् ।
उच्चैर्जह्रुरप्सरसश्च दिव्या
देवा ऊचुर्गम्यतां तीर्थयात्राः ॥ १५-४-६ (९६९७५)
'भगवद्दर्शनस्पर्शस्नेहैर्विततभोगिनः ।
दिवः प्रवेशानार्थं ते विमानैर्दिवमाययुः ॥' १५-४-७ (९६९७६)
ततो जिगमिषन्तस्ते वृष्ण्यन्धकमहारथाः ।
सान्तःपुरास्तदा तीर्थयात्रामैच्छन्नरर्षभाः ॥ १५-४-८ (९६९७७)
ततो मनोहरा हृष्टाःक पेयं मांसं मधूनि च ।
बहु नानाविधं चक्रुस्त्वरिताः कालचोदिताः ॥ १५-४-९ (९६९७८)
ततः सीधुषु सक्ताश्च निर्ययुर्नगराद्बहिः ।
यानैरश्वैर्गजैश्चैव श्रीमन्तस्तिग्मतेजसः ॥ १५-४-१० (९६९७९)
ततः प्रभासे न्यवसन्यथोद्दिष्टं यथागृहम् ।
प्रभूतभक्ष्यपेयास्ते सदारा यादवास्तदा ॥ १५-४-११ (९६९८०)
निविष्टांस्तान्निशाम्याथ समुद्रान्ते स योगवित् ।
जगामामन्त्र्य तान्वीरानुद्धवोऽर्थविशारदः ॥ १५-४-१२ (९६९८१)
तं प्रस्थितं महात्मानमभिवाद्य कृताञ्जलिम् ।
जानन्विनाशं वृष्णीनां नैच्छद्वारयितुं हरिः ॥ १५-४-१३ (९६९८२)
ततः कालपरीतास्ते वृष्ण्यन्धकमहारथाः ।
अपश्यन्नुद्धवं यान्तं तेजसाऽऽवृत्य रोदसी ॥ १५-४-१४ (९६९८३)
ब्राह्मणार्थेषु यत्सिद्धमन्नं तेषां महात्मनाम् ।
तद्वानरेभ्यः प्रददुः सुरागन्धसमन्वितम् ॥ १५-४-१५ (९६९८४)

ततस्तूर्यशताकीर्णं नटनर्तकसंकुलम् ।
अवर्तत महापानं प्रभासे तिग्मतेजसाम् ॥ १५-४-१६ (९६९८५)
कृष्णस्य सन्निधौ रामः सहितः कृतवर्मणा ।
अपिबद्युयुधानश्च गदो बभ्रुस्तथैव च ॥ १५-४-१७ (९६९८६)
ततः परिषदो मध्ये युयुधानो मदोत्कटः ।
अब्रवीत्कृतवर्माणमवहास्यावमत्य च ॥ १५-४-१८ (९६९८७)
कः क्षत्रियो हन्यमानः सुप्तान्हन्यान्मृतानिव ।
तन्न मृष्यन्ति हार्दिक्य यादवा यत्त्वया कृतम् ॥ १५-४-१९ (९६९८८)
इत्युक्ते युयुधानेन पूजयामास तद्वचः ।
प्रद्युम्नो रथिनांश्रेष्ठो हार्दिक्यमवमत्य व ॥ १५-४-२० (९६९८९)
ततः परमसंक्रुद्धः कृतवर्मा तमब्रवीत् ।
निर्दिशन्निव सावज्ञं तदा सव्येन पाणिना ॥ १५-४-२१ (९६९९०)
भूरिश्रवाश्छिन्नबाहुर्युद्धे प्रायगतस्त्वया ।
वधेन सुनृशंसेन कथं वीरेण पातितः ॥ १५-४-२२ (९६९९१)
इति तस्य वचः श्रुत्वा केशवः परवीरहा ।
तिर्यक्सरोषया दृष्ट्या वीक्षांचक्रे स मन्युमान् ॥ १५-४-२३ (९६९९२)
मणिः स्यमन्तकश्चैव यः स सत्राजितोऽभवत् ।
तां कथां श्रावयामास सात्यकिर्मधुसूदनम् ॥ १५-४-२४ (९६९९३)
तच्छ्रुत्वा केशवस्याङ्कमगमद्रुदती तदा ।
सत्यभामा प्रकुपिता कोपयन्ती जनार्दनम् ॥ १५-४-२५ (९६९९४)
तत उत्थाय सक्रोधः सात्यकिर्वाक्यमब्रवीत्। १५-४-२६ (९६९९५)
पञ्चानां द्रौपदेयानां धृष्टद्युम्नशिखण्डिनोः ।
एष गच्छामि पदवीं सत्येन च तथा शपे ॥ १५-४-२७ (९६९९६)
सौप्तिके ये च निहताः सुप्ता येन दुरात्मना ।
द्रोणपुत्रसहायेन पापेन कृतवर्मणा ॥ १५-४-२८ (९६९९७)
समाप्तमायुरस्याद्य यशश्चैव सुमध्यते ।
इत्येवमुक्त्वा खड्गेन केशवस्य समीपतः ।
अभिद्रुत्य शिरः क्रुद्धश्चिच्छेद कृतवर्मणः ॥ १५-४-२९ (९६९९८)
तथाऽन्यानपि निघ्नन्तं युयुधानं समन्ततः ।
अभ्यधावद्धृषीकेशो विनिवारयितुं तदा ॥ १५-४-३० (९६९९९)
एकीभूतास्ततः सर्वे कालपर्यायचोदिताः ।
भोजान्धका महाराज शैनेयं पर्यवारयन् ॥ १५-४-३१ (९७०००)
तान्दृष्ट्वा पततस्तूर्णमभिक्रुद्धाञ्जनार्दनः ।
न चुक्रोध महातेजा जानन्कालस्य पर्ययम् ॥ १५-४-३२ (९७००१)
ते तु पानमदाविष्टाश्चोदिताः कालधर्मणा ।
युयुधानमथाभ्यघ्नन्नुच्छिष्टैर्भाजनैस्तदा ॥ १५-४-३३ (९७००२)

हन्यमाने तु शैनेये क्रुद्धो रुक्मिणिनन्दनः ।
तदनन्तरमागच्छन्मोचयिष्यञ्शिनेः सुतम् ॥ १५-४-३४ (९७००३)
स भोजैः सह संयुक्तः सात्यकिश्चान्धकैः सह ।
व्यायच्छमानौ तौ वीरौ बाहुद्रविणशालिनौ ।
बहुत्वान्निहतौ तत्र उभौ कृष्णस्य पश्यतः ॥ १५-४-३५ (९७००४)
हतं दृष्ट्वा च शैनेयं पुत्रं च यदुनन्दनः ।
एरकाणां ततो मुष्टिं कोपाज्जग्राह केशवः ॥ १५-४-३६ (९७००५)
तदभून्मुसलं घोरं वज्रकल्पमयोमयम् ।
जघान कृष्णस्तांस्तेनि येये प्रमुखतोऽभवन् ॥ १५-४-३७ (९७००६)
ततोऽन्धकाश्च भोजाश्च शैनेया वृष्णयस्तथा ।
जघ्नुरन्योन्यमाक्रन्दे मुसलैः कालचोदिताः ॥ १५-४-३८ (९७००७)
यस्तेषामेरकां कश्चिज्जग्राह कुपितो नृपः ।
वज्रभूतेव सा राजन्नदृश्यत तदा विभो ॥ १५-४-३९ (९७००८)
तृणं च मुसलीभूतमपि तत्र व्यदृश्यत ।
ब्रह्मदण्डकृतं सर्वमिति तद्विद्धि पार्थिव ॥ १५-४-४० (९७००९)
आविध्याविध्य ते राजन्प्रहरन्ति स्म तैस्तृणैः ।
तद्वज्रभूतं मुसलं व्यदृश्यत तदा दृढम् ॥ १५-४-४१ (९७०१०)
अवधीत्पितरं पुत्रः पिता पुत्रं च भारत ।
मत्ताः परिपतन्ति स्म योधयन्तः परस्परम् ॥ १५-४-४२ (९७०११)
पतङ्गा इव चाग्नौ ते निपेतुः कुकुरान्धकाः ।
नासीत्पलायने बुद्धिर्वधायमानस्य कस्यचित् ॥ १५-४-४३ (९७०१२)
तत्रापश्यन्महाबाहुर्जानन्कालस्य पर्ययम् ।
मुसलं समवष्टभ्य तस्थौ स मधुसूदनः ॥ १५-४-४४ (९७०१३)
सांबं च निहतं दृष्ट्वा चारुदेष्णं च माधवः ।
प्रद्युम्नं चानिरुद्धं च ततश्चुक्रोध भारत ॥ १५-४-४५ (९७०१४)
गदं वीक्ष्य शयानं च भृशं कोपसमन्वितः ।
स निःशेषं तदा चक्रे शार्ङ्गचक्रगंदाधरः ॥ १५-४-४६ (९७०१५)
तं निघ्नन्तं महातेजा बभ्रुः परपुरंजयः ।
दारुकश्चैव दाशार्हमूवतुर्यन्निबोध तत् ॥ १५-४-४७ (९७०१६)
भगवन्निहताः सर्वे त्वया भूयिष्ठशो नराः ।
रामस्य पदमन्विच्छ तत्र गच्छाम यत्र सः ॥ ॥ १५-४-४८ (९७०१७)

इति श्रीमन्महाभारते मौसलपर्वणि चतुर्थोऽध्यायः ॥

Mahabharata - Mausala Parva - Chapter Footnotes

७-४-१ मुष्णन्ती स्त्रीणां मङ्गलसूत्रादिकं चोरयन्ती ॥

७-४-१२ निशमम्य दृष्ट्वा ।अर्थविशारदः मोक्षपण्डितः ॥
७-४-१५ ब्राह्मणार्थद्रव्यस्यान्यत्र विनियोजनमायुःक्षयकरमित्यर्थः ॥
७-४-४१ आविध्य विद्ध्वा ॥
७-४-४४ तत्र यन्मुसलमपस्यत्तदेवावष्टभ्य तस्थावित्यन्वयः ॥

मौसलपर्व - अध्याय ००५
॥ श्रीः ॥
१५.५. अध्यायः ५

Mahabharata - Mausala Parva - Chapter Topics
सर्वयादवेषु निहतेषु बभ्रुदारुकाभ्यां सह बलभद्रमन्वेषसाणेन कृष्णेन वने वृक्षाश्रितस्य तस्य दर्शनम् ॥ १ ॥
ततः कृष्णेन पाण्डिवान्प्रति दारुकप्रेषणम् ॥ २ ॥
बलभद्रेण योगात्सर्पशरीरस्वीकारेण समुद्रप्रवेशः ॥ ३ ॥
कृष्णेन शरीरत्यागाय योगेन शयनम् ॥ ४ ॥
व्याधेन मृगबुद्धया कृष्णस्य पादतले सायकेन गाढवेधनम् ॥ ५ ॥
कृष्णेन पश्चात्समीप मेत्य पश्चात्तापेन प्रणमतो व्याधस्य देवैः स्वर्गप्रापणम् ॥ ६ ॥
ततः शरीरत्यागपूर्वकं दिवं गतेन कृष्णेन देवैः पुष्पवर्षण पूर्वकं स्तुत्या प्रत्युद्गम्यमानेनंनि सता निजपरधामप्रवेशः ॥ ७ ॥

Mahabharata - Mausala Parva - Chapter Text

वैशम्पायन उवाच ।
ततो ययुर्दारुकः केशवश्च
बभ्रुश्च रामस्य पदं पतन्तः ।
अथापश्यन्राममनन्तवीर्यं
वृक्षाश्रितं चिन्तयानं विविक्ते। १५-५-१ (९७०१८)
ततः समासाद्य महानुभावः
कृष्णस्तदा दारुकमन्वशासत् ।
गत्वा कुरून्सर्वमिमं महान्तं
पार्थाय शंसस्व वधं यदूनाम् ॥ १५-५-२ (९७०१९)
ततोऽर्जुनः क्षिप्रमिहोपयातु
श्रुत्वा मृतान्यादवान्ब्रह्मशापात् ।
इत्येवमुक्तः स ययौ रथेन
कुरूंस्तदा दारुको नष्टचेताः ॥ १५-५-३ (९७०२०)

ततो गते दारुके केशवोथ
दृष्ट्वान्तिके बभ्रुमुवाच वाक्यम् ।
स्त्रियो भवान्रक्षितुं यातु शीघ्रं
नैता हिंस्युर्दस्यवो वित्तलोभात् ॥ १५-५-४ (९७०२१)
स प्रस्थितः केशवेनानुशिष्टो
मदातुरो ज्ञातिवधार्दितश्च ।
तं वै यातं सन्निधौ केशवस्य
त्वरन्तमेकं सहसैव बभ्रूम् ।
ब्रह्मानुशप्तमवधीन्महद्वै
कूटे युक्तं मुसलं लुब्धकस्य ॥ १५-५-५ (९७०२२)
ततो दृष्ट्वा निहतं बभ्रुमाह
कृष्णेऽग्रजं भ्रातरमुग्रतेजाः ।
इहैव त्वं मां प्रतीक्षस्व राम
यावत्स्त्रियो ज्ञातिवशाः करोमि ॥ १५-५-६ (९७०२३)
ततः पुरीं द्वारवतीं पविश्य
जनार्दनः पितरं प्राह वाक्यम् ।
सर्वं भवान्रक्षतु नः समग्रं
धनंजयस्यागमनं प्रतीक्षन् ॥ १५-५-७ (९७०२४)
रामो वनान्ते प्रतिपालयन्मा-
मास्तेऽद्याहं तेन समानमिष्ये ।
दृष्टं मयेदं निधनं यदूनां
राज्ञां च पूर्वं कुरुपुङ्गवानाम् ॥ १५-५-८ (९७०२५)
नाहं विना यदुभिर्यादवानां
पुरीमिमामशकं द्रष्टुमद्य ।
तपश्चरिष्यामि निबोध तन्मे
रामेणि सार्धं वनमभ्युपेत्य ॥ १५-५-९ (९७०२६)
इतीदमुक्त्वा शिरसा च पादौ
संस्पृश्य कृष्णस्त्वरितो जगाम ।
ततो महान्निनदः प्रादुरासी-
त्सस्त्रीकुमारस्य पुरस्य तस्य ॥ १५-५-१० (९७०२७)
अथाब्रवीत्केशवः सन्निवर्त्य
शब्दं श्रुत्वा योषितां क्रोशतीनाम् ।
पुरीमिमामेष्यति सव्यसाची
स वो दुःखान्मोचयिता नराग्र्यः ॥ १५-५-११ (९७०२८)
ततो गत्वा केशवस्तं ददर्श
रामं वने स्थितमेकं विविक्ते ॥ १५-५-१२ (९७०२९)

अथापश्यद्योगयुक्तस्य तस्य
नागं मुखान्निस्सरन्तं महान्तम् ।
श्वेतं ययौ सततः प्रेक्षमाणो
महार्णवो येन महानुभावः ।
सहस्रशीर्षः पर्वताभोगवर्ष्मा
रक्ताननः स्वां तनुं तां विमुच्य ॥ १५-५-१३ (९७०३०)
संदृश्यन्तं सागरान्तं विशन्तं
सम्यक्तदा सागरः प्रत्यगृह्णात् ।
नागा दिव्याः सरितश्चैव पुण्याः
कर्कोटको वासुकिस्तक्षकश्च ॥ १५-५-१४ (९७०३१)
पृथुश्रवा अरुणः कुञ्जरश्च
मिश्री शङ्खः कुमुदः पुण्डरीकः ।
तथा नागो धृतराष्ट्रो महात्मा
ह्रादः क्राथः शितिपृष्ठो निकेतुः ॥ १५-५-१५ (९७०३२)
तथा नागौ चक्रमन्दातिषण्डौ
नागश्रेष्ठो दुर्मखश्चांबरीषः ।
स्वयं राजा वरुणश्चापि राज-
न्प्रत्युद्गम्य स्वागतेनाभ्यनन्दन् ।
तेऽपूजयंश्चार्घ्यपाद्यक्रियाभिः
सङ्कर्षणं भूधरं शुद्धबुद्धिम् ॥ १५-५-१६ (९७०३३)
ततो गते भ्रातरि वासुदेवो
जानन्सर्वा गतयो दिव्यदृष्टिः ।
वने शून्ये विचरंश्चिन्तयानो
भूमौ चाथ संविवेशाग्र्यतेजाः ॥ १५-५-१७ (९७०३४)
सर्वं तेन प्राक्तदा वित्तमासी-
द्गान्धार्या यद्वाक्यमुक्तं स्वधर्मात् ।
दुर्वाससा पारसोच्छिष्टलिप्ते
यच्चाप्युक्तं तच्च सस्मार कृष्णः ॥ १५-५-१८ (९७०३५)
ग्कुलस्त्रीणां संवृतानां गवां च
द्विजेन्द्राणां बलमादाय धर्मे ।
योनिर्देवानां वरदो ब्रह्मदेवो
गोविन्दाख्यो वासुदेवोऽथ नित्यः ॥ १५-५-१९ (९७०३६)
संचिन्तयन्नन्धकवृष्णिनाशं
कुरुक्षयं चैव महानुभावः ।
मेने ततः संक्रमणस्य कालं
ततश्चकारेन्द्रियसन्निरोधम् ॥ १५-५-२० (९७०३७)

यथा च लोकत्रयपालनार्थं
दुर्वासवाक्यप्रतिपालनाय ।
देवोपि सन्देहविमोक्षहेतो-
र्निमित्तमैच्छत्सकलार्थतत्त्ववित् ॥ १५-५-२१ (९७०३८)
स सन्निरुद्धेन्द्रियवाङ्मनास्तु
शिश्ये महायोगमुपेत्य कृष्णः ।
जरोथ तं देशमुपाजगाम
लुब्धस्तदानीं मृगलिप्सुरुग्रः ॥ १५-५-२२ (९७०३९)
स केशवं योगयुक्तं शयानं
मृगासक्तो लुब्धकः सायकेन ।
जरोऽविध्यत्पादतले त्वरावां-
स्तं चाभितस्तज्जिघृक्षुर्जगाम ॥ १५-५-२३ (९७०४०)
अथापश्यत्पुरुषं योगयुक्तं
पीतांबरं लुब्धकोऽनेकबाहुम् ।
मत्वाऽऽत्मानं त्वपराद्धं स तस्य
पादौ जरो जगृहे शङ्कितात्मा ॥ १५-५-२४ (९७०४१)
आश्वासितः पुण्यफलेन भक्तया
तथाऽनुतापात्कर्मणो जन्मनश्च ।
दृष्ट्वा तथा देवमनन्तवीर्यं
देवैस्स्वर्गं प्रातितस्त्यक्तदेहः ॥ १५-५-२५ (९७०४२)
गणैर्मुनीनां पूजितस्त्यत्र कृष्णो
गच्छन्नूर्द्ध्वं व्याप्य लोकान्स लक्ष्म्या ॥ १५-५-२६ (९७०४३)
दिवं प्राप्तं वासवोऽथाश्विनौ च
रुद्रादित्या वसवश्चाथ विश्वे ।
प्रत्युद्ययुर्मुनयश्चापि सिद्धा
गन्धर्वमुख्याश्च सहाप्सरोभिः ॥ १५-५-२७ (९७०४४)
ततो राजन्भगवानुग्रतेजा
नारायणः प्रभवश्चाव्ययश्च ।
योगाचार्यो रोदसी व्याप्य लक्ष्म्या
स्थानं प्राप स्वं महात्माऽप्रमेयम् ॥ १५-५-२८ (९७०४५)
ततो देवैर्ऋषिभिश्चापि कृष्णः
समागतश्चारणैश्चैव राजन् ।
गन्धर्वाग्र्यैरप्सरोभिर्वराभिः
सिद्धैः साध्यैश्चानतैः पूज्यमानः ॥ १५-५-२९ (९७०४६)
तं वै देवाः प्रत्यनन्दन्त राज-
न्मुनिश्रेष्ठा ऋग्भिरानर्चुरीशम् ।

तं गन्धर्वाश्चापि तस्थुः स्तुवन्तः
प्रीत्य चैनं पुरुहूतोऽभ्यनन्दत् ॥ १५-५-३० (९७०४७)
ग्नमोनमस्ते भगवञ्शार्ङ्गधन्व-
न्धर्मस्थित्या प्रादुरासीर्धरायाम् ।
कंसाख्यादीन्देवशत्रूंश्च सर्वा-
न्हत्वा भूमिः स्थापिता भारतप्ता ॥ १५-५-३१ (९७०४८)
दिव्यं स्थानमजरं चाप्रमेयं
दुर्विज्ञेयं चागमैर्गम्यमग्र्यम् ।
गच्छ प्रभो रक्ष चार्तिं प्रपन्ना-
न्कल्पेकल्पे जायमानांश्च मर्त्यान् ॥ १५-५-३२ (९७०४९)
इत्येवमुक्त्वा देवसंघोऽनुगम्य
श्रिया युक्तं पुष्पवृष्ट्या ववर्ष ।
वाणी चासीत्संश्रिता रूपिणी सा
भानोर्मध्ये प्रविश त्वं तु राजन् ॥ १५-५-३३ (९७०५०)
भुजैश्चतुर्भिः समुपेतं ममेदं
रूपं विशिष्टं जीवितं संस्थितं च ।
भूमौ गतं पूजयताप्रमेयं
सदा हि तस्मिन्निवसामीति देवाः ॥ १५-५-३४ (९७०५१)
देवा निवृत्तास्तत्पदं नाप्नुवन्तो
बुद्ध्या देवं संस्मरन्तः प्रतीताः ।
ब्रह्माद्यास्ते तद्गुणान्कीर्तयन्तः
शुभाँल्लोकान्स्वान्प्रपेदुः सुरेन्द्राः ॥ ॥ १५-५-३५ (९७०५२)

इति श्रीमन्महाभारते मौसलपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥
Mahabharata - Mausala Parva - Chapter Footnotes

७-५-१ पतन्तः शीघ्रं गच्छन्तः ॥
७-५-२ वधं मधूनामिति क ट । पाठः ॥
७-५-४ वित्तभावात् इति ट पाठः ॥
७-५-५ कूटे लोहमुद्गरे युक्त बद्ध भुसलं ब्राह्मणशप्तं बभ्रुं स्वयमेव निपत्यावधीत् ॥
७-५-७ स्त्रियो भवान्रक्षत्विति झ पाठः ॥
७-५-१३ महार्णवे येन इति क ट पाठः ॥

मौसलपर्व - अध्याय ००६
॥ श्रीः ॥

१५.६. अध्यायः ६

Mahabharata - Mausala Parva - Chapter Topics

दारुकेण हास्तिनपुरमेत्य पाण्डवेषु सर्वयादवक्षयनिवेदनम् ॥ १ ॥
अर्जुनेन द्वारकामेत्य रुक्मिण्यादिपरिसान्त्वनपूर्वकं वसुदेवगृहंप्रति
गमनम् ॥ २ ॥

Mahabharata - Mausala Parva - Chapter Text

वैशम्पाय उवाच ।
दारुकोपि कुरून्गत्वा दृष्ट्वा पार्थान्महारथान् ।
आचष्ट मौसले वृष्णीनन्योन्येनोपसंहृतान् ॥ १५-६-१ (९७०५३)
श्रुत्वा विनष्टान्वार्ष्णेयान्सभोजान्धककौकुरान् ।
पाण्डवाः शोकसंतप्ता वित्रस्तमनसोऽभवन् ॥ १५-६-२ (९७०५४)
ततोऽर्जुनस्तानामन्त्र्य केशवस्य प्रियः सखा ।
प्रययौ मातुलं द्रष्टुं नेदमस्तीति चाब्रवीत् ॥ १५-६-३ (९७०५५)
स वृष्णिनिलयं गत्वा दारुकेण सह प्रभो ।
ददर्श द्वारकां वीरो मृतनाथामिव स्त्रियम् ॥ १५-६-४ (९७०५६)
याः स्म ता लोकनाथेन नाथवत्यः पुराऽभवन् ।
तास्त्वनाथास्तदा नाथं पार्थं दृष्ट्वा विचुक्रुशुः ॥ १५-६-५ (९७०५७)
षोडश स्त्रीसहस्राणि वासुदेवपरिग्रहाः ।
तासामासीन्महान्नादो दृष्ट्वैवार्जुनमागतम् ॥ १५-६-६ (९७०५८)
तास्तु दृष्ट्वैव कौरव्यो बाष्पेणापिहितेक्षणः ।
हीनाः कृष्णेन पुत्रैश्च नाशकत्सोभिवीक्षितुम् ॥ १५-६-७ (९७०५९)
स तां वृष्ण्यन्धकजलां हयमीनां रथोडुपाम् ।
वादित्ररथघोषौघां वेश्मतीर्थमहाग्रहाम् ॥ १५-६-८ (९७०६०)
रत्नशैवलसंघातां वज्रप्राकारमालिनीम् ।
रथ्यास्रोतोजलावर्तां चत्वरस्तिमितह्रदाम् ॥ १५-६-९ (९७०६१)
रामकृष्णमहाग्राहां द्वारकां सरितं तदा ।
कालपाशग्रहां भीमां नदीं वैतरणीमिव ॥ १५-६-१० (९७०६२)
ददर्श वासविर्धीमान्विहीनां वृष्णिपुङ्गवैः ।
गतश्रियं विरानन्दां पद्मिनीं शिशिरे यथा। १५-६-११ (९७०६३)
तां दृष्ट्वा द्वारकां पार्थस्ताश्च कृष्णस्य योषितः ।
सस्वनं बाष्पमुत्सृज्य निपात महीतले ॥ १५-६-१२ (९७०६४)
सात्राजिती ततः सत्या रुक्मिणी च विशांपते ।
अभिपत्य प्ररुरुदुः परिवार्य धनंजयम् ॥ १५-६-१३ (९७०६५)

ततस्तं काञ्चने पीठे समुत्ताप्योपवेश्य च ।
अभिनन्द्य महात्मानं परिवार्योपतस्थिरे ॥ १५-६-१४ (९७०६६)
ततः संस्तूय गोविन्दं कथयित्वा च पाण्डवः ।
आश्वास्य ताः स्त्रियश्चापि मातुलं द्रष्टुमभ्यगात् ॥ ॥ १५-६-१५ (९७०६७)

इति श्रीमन्महाभारते मौसलपर्वणि षष्ठोऽध्यायः ॥ ६ ॥
Mahabharata - Mausala Parva - Chapter Footnotes

७-६-१४ अब्रुवन्त्यो महामानमिति झ पाठः ॥

मौसलपर्व - अध्याय ००७
॥ श्रीः ॥
१५.७. अध्यायः ७

Mahabharata - Mausala Parva - Chapter Topics
वसुदेवेन स्वगृहमागतेऽर्जुने यादवक्षयनिदाननिवेदनपूर्वकं
कृष्णाद्यनुस्मरणेन परिशोचनम् ॥ १ ॥
तथा तंप्रति कृष्णवचननिवेदनेन राज्यस्त्रीधनादिसमर्पणपूर्वकं
स्वेन स्वप्राणत्यजनप्रतिज्ञानम् ॥ २ ॥

Mahabharata - Mausala Parva - Chapter Text

वैशम्पायन उवाच ।
तं प्रविष्टं महात्मानं वीरमानकदुन्दुभिः ।
पुत्रशोकेन संतप्तो ददर्श कुरुपुङ्गवम् ॥ १५-७-१ (९७०६८)
तस्याश्रुपरिपूर्णाक्षो व्यूढोरस्को महाभुजः ।
आर्तस्यार्ततरः पार्थः पादौ जग्राह भारत ॥ १५-७-२ (९७०६९)
तस्य मूर्धानमाघ्रातुमियेषानकदुन्दुभिः ।
स्वस्रीयस्य महाबाहुर्न शशाक च शत्रुहन् ॥ १५-७-३ (९७०७०)
समालिङ्ग्यार्जुनं वृद्धः स भुजाभ्यां महाभुजः ।
रुरोदाथ स्मरञ्शौरिं विललाप सुविह्वलः ।
भ्रातॄन्पुत्रांश्च पौत्रांश्च दौहित्रान्स सखीनपि ॥ १५-७-४ (९७०७१)
वसुदेव उवाच। १५-७-५क्ष् (८०२५)
यैर्जिता भूमिपालाश्च दैत्याश्च शतशोऽर्जुन ।
तान्सर्वान्नेह पश्यामि जीवाम्यर्जुन दुर्मरः ॥ १५-७-५ (९७०७२)
यो तावर्जुनशिष्यौ ते प्रियौ बहुमतौ सदा ।

तयोरपनयात्पार्थ वृष्णयो निधनं गताः ॥ १५-७-६ (९७०७३)
यौ तौ वृष्णिप्रवीराणां द्वावेवातिरथौ मतौ ।
प्रद्युम्नो युयुधानश्च कथनन्कत्थसे च यौ ॥ १५-७-७ (९७०७४)
तौ सदा कुरुशार्दूल कृष्णस्य प्रियभाजनौ ।
तावुभौ वृष्णिनाशस्य मुखमास्तां धनंजय ॥ १५-७-८ (९७०७५)
न तु गर्हामि शैनेयं हार्दिक्यं चाहमर्जुन ।
अक्रूरं रौक्मिणेयं च शापो ह्येवात्र कारणम् ॥ १५-७-९ (९७०७६)
केशिनं यस्तु कंसं च विक्रम्यि हतवान्प्रभुः ।
विदेहमकरोत्पार्थ चैद्यं च बलगर्वितम् ॥ १५-७-१० (९७०७७)
नैषादिमेकलव्यं च चक्रे कालिङ्गमागधान् ।
गान्धारान्काशिराजं च मरुभूमौ च पार्थिवान् ॥ १५-७-११ (९७०७८)
प्राच्यांश्च दाक्षिणात्यांश्च पार्वतीयांस्तथा नृपान् ।
सोभ्युपेक्षितवानेवमनयान्मधुसूदनः ॥ १५-७-१२ (९७०७९)
त्वं हि तं नारदश्चैव मुनयश्च सनातनम् ।
गोविन्दमनघं देवमभिजानीध्वमच्युतम् ॥ १५-७-१३ (९७०८०)
प्रत्यपश्यच्च स विभुर्ज्ञातिक्षयमधोक्षजः ।
समुपेक्षितवान्नित्यं स्वयं स मम पुत्रकः ॥ १५-७-१४ (९७०८१)
गान्धार्या वचनं यत्तदृषीणां च परंतप ।
तन्नूनमन्यथा कर्तुं नैच्छत्स जगतः प्रभुः ॥ १५-७-१५ (९७०८२)
प्रत्यक्षं भवतश्चापि तव पौत्रः परंतप ।
अश्वत्थाम्ना हतश्चापि जीवितस्तस्य तेजसा ।
इमांस्तु नैच्छत्स्वान्ज्ञातीन्रक्षितुं च सखा तव ॥ १५-७-१६ (९७०८३)
ततः पुत्रांश्च पौत्रांश्च भ्रातॄनथ सखींस्तथा ।
शयानान्निहतान्दृष्ट्वा कृष्णो मामब्रवीदिदम् ॥ १५-७-१७ (९७०८४)
सम्प्राप्तोऽद्यायमस्यान्तः कुलस्य भरतर्षभ ।
आगमिष्यति बीभत्सुरिमां द्वारवतीं पुरीम् ।
आख्येयं तस्य यद्वृत्तं वृष्णीनां वैशसं महत् ॥ १५-७-१८ (९७०८५)
स तु श्रुत्वा महातेजा यदूनां निधनं प्रभो ।
आगन्ता क्षिप्रमेवेह न मेऽत्रास्ति विचारणा ॥ १५-७-१९ (९७०८६)
योऽहं तमर्जुनं विद्धि योऽर्जुनः सोहमेव तु ।
यद्ब्रूयात्तत्तथा कार्यमिति बुद्ध्यस्व भारत ॥ १५-७-२० (९७०८७)
स स्त्रीषु प्राप्तकालासु पाण्डवो बालकेषु च ।
प्रतिपत्स्यति बीभत्सुर्भवतश्चौर्ध्वदैहिकम् ॥ १५-७-२१ (९७०८८)
इमां च नगरीं सद्यः प्रतियाते धनंजये ।
प्राकारट्टालकोपेतां समुद्रः प्लावयिष्यति ॥ १५-७-२२ (९७०८९)
अहं देशे तु कस्मिंश्चित्पुण्ये नियममास्थितः ।

कालं काङ्क्षे सद्य एव रामेण सहितो वने ॥ १५-७-२३ (९७०९०)
एवमुक्त्वा हृषीकेशो मामचिन्त्यपराक्रमः ।
हित्वा मां बालकैः सार्धं दिशं कामप्यगात्प्रभुः ॥ १५-७-२४ (९७०९१)
सोहं तौ च महात्मानौ चिन्तयन्रामकेशवौ ।
घोरं ज्ञातिवधं चैव न भुञ्जे शोककर्शितः ॥ १५-७-२५ (९७०९२)
न मोक्ष्येन च जीविष्ये दिष्ट्या प्राप्तोसि पाण्डव ।
यदुक्तं पार्थ कृष्णेन तत्सर्वमखिलं कुरु ॥ १५-७-२६ (९७०९३)
एतत्ते पार्थ राज्यं च स्त्रियो रत्नानि चैव हि ।
इष्टान्प्राणानहं हीमांस्त्यक्ष्यामि रिपुसूदन ॥ ॥ १५-७-२७ (९७०९४)

इति श्रीमन्महाभारते मौसलपर्वणि सप्तमोऽध्यायः ॥ ७ ॥

Mahabharata - Mausala Parva - Chapter Footnotes

७-७-११ काशिराजं पौण्ड्रकम् ॥

मौसलपर्व - अध्याय ००८

॥ श्रीः ॥

१५.८. अध्यायः ८

Mahabharata - Mausala Parva - Chapter Topics

अर्जुनेन वसुदेवसमाश्वासनपूर्वकं सकलपौरान्प्रति
नातिचिरादेव द्वारकायाः समुद्रेण समाप्लावननिवेदनपूर्वकं
सर्वेषामिन्द्रप्रस्थंप्रति प्रयाणसंनाहसंचोदना ॥ १ ॥
तथा परेद्युर्योगेन शरीरंत्यक्तवतो वसुदेवस्य पत्नीभिः सह
संस्करणपूर्वकं रामकृष्णशरीरयोर्दाहनम् ॥ २ ॥
ततो वज्रार्जुनपुरस्कारेण सकलपौरजने पुरःपुनः प्रयाते समुद्रेण
पश्चाद्भागे पौरजनमुक्ततत्तद्भागस्य स्वजलेन समाक्रमणम् ॥ ३ ॥
अर्जुनेन मध्येमार्गं चोरापहृतावशिष्टयादवकलत्रादिभिः सह
स्वदेशमेत्य युधिष्ठिराज्ञया वज्रस्येन्द्रप्रस्थराज्येऽभिषेचनम्
। तथा सात्यकिसुतादीनां तत्रतत्र राज्येऽभिषेचनम् ॥ ३ ॥
रुक्मिण्यादिभिः काभिश्चिदग्निप्रवेशनम् । सत्यभामादिभिः काभिश्चन
तपसे वनगमनम् ॥ ४ ॥

Mahabharata - Mausala Parva - Chapter Text

वैशम्पायन उवाच ।

एवमुक्तः स बीभत्सुर्मातुलेनि परंतप ।
दुर्मना दीनवदनो वसुदेवमुवाच ह ॥ १५-८-१ (९७०९५)
नाहं वृष्णिप्रवीरेण बन्धुभिश्चैव मातुल ।
विहीनां पृथिवीं द्रष्टुं शक्तश्चिरमिह प्रभो ॥ १५-८-२ (९७०९६)
राजा च भीमसेनश्च सहदेवश्च पाण्डवः ।
नकुलो याज्ञसेनी च षडेकमनसो वयम् ॥ १५-८-३ (९७०९७)
राज्ञः संक्रमणे चापि कामोऽयं नित्यमेव हि ।
तमिमं विद्धि सम्प्राप्तं कालं कालविदांवर ॥ १५-८-४ (९७०९८)
सर्वथा वृष्णिदारांस्तु बालं वृद्धं तथैव च ।
नयिष्ये परिगृह्याहमिन्द्रप्रस्थमरिंदम ॥ १५-८-५ (९७०९९)
इत्युक्त्वा दारुकमिदं वाक्यमाह धनंजयः ।
अमात्यान्वृष्णिवीराणां द्रष्टुमिच्छामि माचिरम् ॥ १५-८-६ (९७१००)
इत्येवमुक्त्वा वचनं सुधर्मां यादवीं सभाम् ।
प्रविवेशार्जुनः शूरः शोचमानो महाभुजः ॥ १५-८-७ (९७१०१)
तमासनगतं तत्र सर्वाः प्रकृतयस्तथा ।
ब्राह्मणा नागरास्तत्र परिवार्योपतस्थिरे ॥ १५-८-८ (९७१०२)
तान्दीनमनसः सर्वान्विमूढान्गतचेतसः ।
उवाचेदं वचः काले पार्थो दीनतरस्तथा ॥ १५-८-९ (९७१०३)
शक्रप्रस्थमहं नेष्ये पृष्णन्धकजनं स्वयम् ।
इदं तु नगरं सर्वं समुद्रः प्लावयिष्यति ॥ १५-८-१० (९७१०४)
सज्जीकुरुत यानानि रत्नानि विविधानि च ।
वज्रोऽयं भवतां राजा शक्रप्रस्थे भविष्यति ॥ १५-८-११ (९७१०५)
सप्तमे दिवसे चैव रवौ विमल उद्गते ।
बहिर्वत्स्यामहे सर्वे सज्जीभावत माचिरम् ॥ १५-८-१२ (९७१०६)
इत्युक्तास्तेन ते सर्वे पार्थेनाक्लिष्टकर्मणा ।
सज्जमाशु ततश्चक्रुः स्वसिद्ध्यर्थं समुत्सुकाः ॥ १५-८-१३ (९७१०७)
तां रात्रिमवसत्पार्थः केशवस्य निवेशने ।
महता शोकमोहेन सहसाऽभिपरिप्लुतः ॥ १५-८-१४ (९७१०८)
श्वोभूतेऽथ ततः शौरिर्वसुदेवः प्रतापवान् ।
युक्त्वाऽऽत्मानं महातेजा जगाम गतिमुत्तमां ॥ १५-८-१५ (९७१०९)
ततः शब्दो महानासीद्वसुदेवनिवेशने ।
दारुणः क्रोशतीनां च रुदतीनां च योषिताम् ॥ १५-८-१६ (९७११०)
प्रकीर्णमूर्धजाः सर्वा विमुक्ताभरणस्रजः ।
उरांसि पाणिभिर्घ्नन्त्यो व्यलपन्तकरुणं स्त्रियः। १५-८-१७ (९७१११)
तं देवकी च भद्रा च रोहिणी मदिरा तथा ।
अन्वारोढुं व्यवसिता भर्तारं योषितां वराः ॥ १५-८-१८ (९७११२)

ततः शौरिं नृयुक्तेन बहुमूल्येन भारत ।
यानेन महता पार्थो बहिर्निष्क्रामयत्तदा ॥ १५-८-१९ (९७११३)
तमन्वयुस्तत्रतत्रं दुःखसोकसमन्विताः ।
द्वारकावासिनः सर्वे पौरजानपदा हिताः ॥ १५-८-२० (९७११४)
तस्याश्वमेधिकं छत्रं दीप्यमानाश्च पावकाः ।
पुरस्तात्तस्य यानस्य याजकाश्च ततो ययुः ॥ १५-८-२१ (९७११५)
अनुजग्मुश्च तं वीरं देव्यस्ता वै स्वलङ्कृताः ॥
स्त्रीसहस्रैः परिवृता वधूभिश्च सहस्रशः ॥ १५-८-२२ (९७११६)
यस्तु देशः प्रियस्तस्य जीवतोऽभून्महात्मनः ।
तत्रैनमुपसंकल्प्य वितृमेधं प्रचक्रिरे ॥ १५-८-२३ (९७११७)
तं चिताग्निगतं वीरं शूरपुत्रं वराङ्गनाः ।
ततोन्वारुरुहुः पत्न्यश्चतस्रः पतिलोकगाः ॥ १५-८-२४ (९७११८)
तं वै चतसृभिः स्त्रीभिरन्वितं पाण्डुनन्दनः ।
अदाहयच्चन्दनैश्च गन्धैरुच्चावचैरपि ॥ १५-८-२५ (९७११९)
ततः प्रादुरभूच्छब्दः समिद्धस्य विभावसोः ।
सामगानां च निर्घोषो नराणां रुदतामपि ॥ १५-८-२६ (९७१२०)
ततो वज्रप्रधानास्ते वृष्ण्यन्धककुमारकाः ।
सर्वे चैवोदकं चक्रुः स्त्रियश्चैव महात्मनः। १५-८-२७ (९७१२१)
अलुप्तधर्मस्तं धर्मं कारयित्वा स फल्गुनः ।
जगाम वृष्णयो यत्र विनष्टा भरतर्षभ ॥ १५-८-२८ (९७१२२)
स तान्दृष्ट्वा निपतितान्कदने भृशदुःखितः ।
बभूवातीव कौरव्यः प्राप्तकालं चकार ह ॥ १५-८-२९ (९७१२३)
यथाप्रधानतश्चैव चक्रे सर्वास्तथा क्रियाः ।
ये हता ब्रह्मशापेन मुसलैरेरकोद्भवैः ॥ १५-८-३० (९७१२४)
ततो भगवतो देहं दृष्ट्वा शिष्यः प्रलप्य च ।
स्मृत्वा तद्वचनं सर्वं मोहशोकोपबृंहितः ॥' १५-८-३१ (९७१२५)
ततः शरीरे रामस्य वासुदेवस्य चोभयोः ।
अन्वीक्ष्य दाहयामास पुरुषैराप्तकारिभिः ॥ १५-८-३२ (९७१२६)
स तेषां विधिवत्कृत्वा प्रेतकार्याणि पाण्डवः ।
सप्तमे दिवसे प्रायाद्रथमारुह्य सत्वरः ॥ १५-८-३३ (९७१२७)
अश्वयुक्तै रथैश्चापि गोखरोष्ट्रयुतैरपि ।
स्त्रियस्ता वृष्णिवीराणां रुदन्त्यः शोककर्शिताः ॥ १५-८-३४ (९७१२८)
अनुजग्मुर्महात्मानं पाण्डुपुत्रं धनंजयम् ।
भृत्याश्चान्धकवृष्णीनां सादिनो रथिनश्च ये ॥ १५-८-३५ (९७१२९)
वीरहीना वृद्धबालाः पौरजानपदास्तथा ।
ययुस्ते परिवार्याथ कलत्रं पार्थशासनात् ॥ १५-८-३६ (९७१३०)

कुञ्जरैश्च गजारोहा ययुः शैलनिभैस्तथा ।
सपादरक्षैः संयुक्ताः सोत्तरायुधिका ययुः ॥ १५-८-३७ (९७१३१)
पुत्राश्चान्धकवृष्णीनां सर्वे पार्थमनुव्रताः ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव महाधनाः ॥ १५-८-३८ (९७१३२)
दश षट् च सहस्राणि वासुदेवावरोधनम् ।
पुरस्कृत्य ययुर्वज्रं पौत्रं कृष्णस्य धीमतः ॥ १५-८-३९ (९७१३३)
बहूनि च सहस्राणि प्रयुतान्यर्बुदानि च ।
भोजवृष्ण्यन्धकस्त्रीणां हतनाथानि निर्ययुः ॥ १५-८-४० (९७१३४)
तत्सागरसमप्रख्यं वृष्णिचक्रं महर्द्धिमत् ।
उवाह रथिनांश्रेष्ठः पार्थः परपुरंजयः ॥ १५-८-४१ (९७१३५)
निर्याते तु जने तस्मिन्सागरो मकरालयः ।
द्वारकां रत्नसंपूर्णां जलेनाप्लावयत्तदा ॥ १५-८-४२ (९७१३६)
यद्यद्धि पुरुषव्याघ्रो भूमेस्तस्या व्यमुञ्चत ।
तत्तत्संप्लावयामास सलिलेन स सागरः ॥ १५-८-४३ (९७१३७)
तदद्भुतमभिप्रेक्ष्य द्वारकावासिनो जनाः ।
तूर्णात्तूर्णतरं जग्मुरहो दैवमिति ब्रुवन् ॥ १५-८-४४ (९७१३८)
काननेषु च रम्येषु पर्वतेषु नदीषु च ।
निवसन्नानयामास वृष्णिदारान्धनंजयः ॥ १५-८-४५ (९७१३९)
स पञ्चनदमासाद्य धीमानतिसमृद्धिमत् ।
देशे गोपशुधान्याढ्ये निवासमकरोत्प्रभुः ॥ १५-८-४६ (९७१४०)
ततो लोभः समभवद्दस्यूनां निहतेश्वराः ।
दृष्ट्वा स्त्रियो नीयमानाः पार्थेनैकेन भारत ॥ १५-८-४७ (९७१४१)
ततस्ते पापकर्माणो लोभोपहतचेतसः ।
आभीरा मन्त्रयामासुः समेत्याशुभदर्शनाः ॥ १५-८-४८ (९७१४२)
अयमेकोऽर्जुनो धन्वी वृद्धबालं हतेश्वरम् ।
नयत्यस्मानतिक्रम्य् योधाश्चेमे हतौजसः ॥ १५-८-४९ (९७१४३)
ततो यष्टिप्रहरणा दस्यवस्ते सहस्रशः ।
अभ्यधावन्त वृष्णीनां तं जनं लोप्त्रहारिणः ॥ १५-८-५० (९७१४४)
महता सिंहनादेन त्रासयन्तः पृथग्जनम् ।
अभिपेतुर्धनार्थं ते कालपर्यायचोदिताः ॥ १५-८-५१ (९७१४५)
ततो निवृत्तः कौन्तेयः सहसा सपदानुगः ।
उवाच तान्महाबाहुरर्जुनः प्रहसन्निव ॥ १५-८-५२ (९७१४६)
निवर्तध्वमधर्मज्ञा यदि जीवितुमिच्छथ ।
इदानीं शरनिर्भिन्नाः शोचध्वं निहता मया ॥ १५-८-५३ (९७१४७)
तथोक्तास्तेन वीरेणि कदर्तीकृत्य तद्वचः ।
अभिपेतुर्जनं मूढा वार्यमाणाः पुनःपुनः ॥ १५-८-५४ (९७१४८)

ततोऽर्जुनो धनुर्दिव्यं गाण्डीवमजरं महत् ।
कआरोपयितुमारेभे यत्नादिव कथञ्चन ॥ १५-८-५५ (९७१४९)
चकार सज्यं कृच्छ्रेणि सम्भ्रमे तुमुले सति ।
चिन्तयामास शस्त्राणि न च सस्मार तान्यपि ॥ १५-८-५६ (९७१५०)
वैकृतं तन्महद्दृष्ट्वा भुजवीर्यं तथा युधि ।
दिव्यानां च महास्त्राणां विनाशाद्व्रीडितोऽभवत् ॥ १५-८-५७ (९७१५१)
वृष्णियोधाश्च ते सर्वे गजाश्वरथयोधिनः ।
न शेकुरावर्तयितुं ह्रियमाणं स्वकं धनम् ॥ १५-८-५८ (९७१५२)
कलत्रस्य बहुत्वाद्धि सम्पतन्सु ततस्ततः ।
प्रयत्नमकरोत्पार्थो जनस्य परिरक्षणे ॥ १५-८-५९ (९७१५३)
मिषतां सर्वयोधानां ततस्ताः प्रमदोत्तमाः ।
समन्ततोवकृष्यन्त कामाच्चान्याः प्रवव्रजुः ॥ १५-८-६० (९७१५४)
ततो गाण्डीवनिर्मुक्तैः शरैः पार्थो धनंजयः ।
जघान दस्यून्सोद्वेगो वृष्णिभृत्यैः सहस्रशः ॥ १५-८-६१ (९७१५५)
क्षणेन तस्य ते राजन्क्षयं जग्मुरजिह्मगाः ।
अक्षया हि पुरा भूत्वा क्षीणाः क्षतजभोजनाः ॥ १५-८-६२ (९७१५६)
स शरक्षयमासाद्य दुःखशोकसमाहतः ।
धनुष्कोट्या तदा दस्यूनवधीत्पाकशासनिः ॥ १५-८-६३ (९७१५७)
श्प्रेक्षतस्त्वेव पार्थस्य वृष्ण्यन्धकवरस्त्रियः ।
जग्मुरादाय ते म्लेच्छाः समन्ताज्जनमेजय ॥ꣳ १५-८-६४ (९७१५८)
धनंजयस्तु दैवं तन्मनसाऽचिन्तयत्प्रभुः ।
दुःखसोकसमाविष्टो निःश्वासपरमोऽभवत् ॥ १५-८-६५ (९७१५९)
अस्त्राणां च प्रणाशेन बाहुवीर्यस्य च क्षयात् ।
धनुषश्चाविधेयत्वाच्छराणां संक्षयेण च ॥ १५-८-६६ (९७१६०)
बभूव विमनाः पार्थो दैवमित्युनुचिन्तयन् ।
न्यवर्तत ततो राजन्नेदमस्तीति चिन्तयन् ॥ १५-८-६७ (९७१६१)
ततः शेषं समादाय कलत्रस्य महामतिः ।
हृतभूयिष्ठरत्नस्य कुरुक्षेत्रमवातरत् ॥ १५-८-६८ (९७१६२)
युधिष्ठिरस्यानुमते वंशकर्तॄन्कुमारकान् ।
न्यवेशयत कौरव्यस्तत्रतत्र धनंजयः ॥ १५-८-६९ (९७१६३)
हार्दिक्यतनयं पार्थो नगरे मृत्तिकावते ।
अश्वपतिं खाण्डवारण्ये राज्ये तत्र न्येवशयत् ।
भोजराजकलत्रं च हृतशेषं नरोत्तमः ॥ १५-८-७० (९७१६४)
तथा वृद्धांश्च बालांश्च स्त्रियश्चादाय पाण्डवः ।
वीरैर्विहीनान्सर्वांस्ताञ्शक्रप्रस्थे न्यवेशयत् ॥ १५-८-७१ (९७१६५)
यौयुधानिं सरस्वत्याः पुत्रं सात्यकिनः प्रियम् ।

न्यवेशयत धर्मात्मा वृद्धबालपुरस्कृतम् ॥ १५-८-७२ (९७१६६)
इन्द्रप्रस्थे ददौ राज्यं वज्राय परवीरहा ।
वज्रेणाक्रूरदारास्तु वार्यमाणाः प्रवव्रजुः ॥ १५-८-७३ (९७१६७)
रुक्मिणी त्वथ गान्धारी शैब्दा हैमवतीत्यपि ।
देवी जींबवती चैव विविशुर्जातवेदसम् ॥ १५-८-७४ (९७१६८)
सत्यभामा तथैवान्या देव्यः कृष्णस्य सम्मताः ।
वनं प्रविविशू राजंस्तापस्ये कृतनिश्चयाः ॥ १५-८-७५ (९७१६९)
द्वारकावासिनो ये पुरुषाः पार्थमभ्ययुः ।
यथार्हं संविभज्यैनान्वज्रे पर्यददज्जयः ॥ १५-८-७६ (९७१७०)
स तत्कृत्वा प्राप्तकालं बाष्णेणापिहितोऽर्जुनः ।
कृष्णद्वैपायनं व्यासं ददर्शासीनमाश्रमे ॥ ॥ १५-८-७७ (९७१७१)

इति श्रीमन्महाभारते मौसलपर्वणि अष्टमोऽध्यायः ॥ ८ ॥
Mahabharata - Mausala Parva - Chapter Footnotes

७-८-३२ अन्विष्य दाहयामासेति झ पाठः ॥
७-८-४४ ब्रुवन् अब्रुवन् ॥

मौसलपर्व - अध्याय ००९
॥ श्रीः ॥
१५.९. अध्यायः ९

Mahabharata - Mausala Parva - Chapter Topics
अर्जुनेन व्यासाश्रमे तद्दर्शनम् ॥ १ ॥
तस्मिन्द्वारकावृत्तान्तनिवेदनम् ॥ २ ॥
व्यासेनार्जुनंप्रति युधिष्ठिरादीनामपि स्वर्गगमनसूचनम् ॥ ३ ॥
ततोऽर्जुनेन हास्तिनपुरमेत्य युधिष्ठिरे द्वारकावृत्तान्तादिनिवेदनम् ॥ ४ ॥

Mahabharata - Mausala Parva - Chapter Text

वैशम्पायन उवाच ।
प्रविश्य त्वर्जुनो राजन्नाश्रमं सत्यवादिनः ।
ददर्शासीनमेकान्तो मुनिं सत्यवतीसुतम् ॥ १५-९-१ (९७१७२)
स तमासाद्य धर्मज्ञमुपतस्थे महाव्रतम् ।
अर्जुनोस्मीति नामास्तै निवेद्याभ्यवदत्ततः ॥ १५-९-२ (९७१७३)
स्वागतं तेऽस्त्विति प्राह मुनिः सत्यवतीसुतः ।

आस्यतामिति होवाच प्रसन्नात्मा महामुनिः ॥१५-९-३ (९७१७४)
तमप्रतीतमनसं निःश्वसन्तं पुनःपुनः ।
निर्विष्णमनसं दृष्ट्वा पार्थं व्यासोऽब्रवीदिदम् ॥१५-९-४ (९७१७५)
नखकेशदशाकुंभवारिणा किं समुक्षितः ।
आवीरजानुगमनं ब्राह्मणो वा हतस्त्वया ॥१५-९-५ (९७१७६)
युद्धे पराजितो वाऽसि दतश्रीरिव लक्ष्यसे ।
न त्वां प्रभिन्नं जानामि किमिदं भरतर्षभ ।
श्रोतव्यं चेन्मया पार्थ क्षिप्रमाख्यातुमर्हसि ॥ १५-९-६ (९७१७७)
अर्जुन उवाच।१५-९-७क्ष् (८०२६)
यः स मेघवपुः श्रीमान्बृहत्पङ्कजलोचनः ।
स कृष्णः सह रामेण त्यक्त्वा देहं दिवं गतः ॥१५-९-७ (९७१७८)
ग्तदनुस्मृत्य संमोहं तदा शोकं महामते ।
प्रयामि सर्वदा मह्यं मुमूर्षा चोपजायते ॥१५-९-८ (९७१७९)
तद्वाक्यस्पर्शनालोकसुखं चामृतसन्निभम् ।
संस्मृत्य देवदेवस्य प्रमुह्यित्यमृतात्मनः ॥' १५-९-९ (९७१८०)
मौसले वृष्णिवीराणां विनाशो ब्रह्मशापजः ।
बभूव वीरान्तकरः प्रभासे रोमहर्षणः ॥१५-९-१० (९७१८१)
एते शूरा महात्मानः सिंहदर्पा महाबलाः ।
भोजवृष्ण्यन्धका ब्रह्मन्नन्योन्यं तैर्हतं युधि ॥१५-९-११ (९७१८२)
गदापरिघशक्तीनां सहाः परिघबाहवः ।
त एरकाभिर्निहताः पश्य कालस्य पर्ययम् ॥१५-९-१२ (९७१८३)
हतं पञ्चशतं तेषां सहस्रं बाहुशालिनाम् ।
निधनं समनुप्राप्तं समासाद्येतरेतरम् ॥१५-९-१३ (९७१८४)
पुनःपुनर्न मृष्यामि विनाशममितौजसाम् ।
चिन्तयानो यदूनां च कृष्णस्य च यशस्विनः ॥१५-९-१४ (९७१८५)
शोषणं सागरस्येव मन्दरस्येव चालनम् ।
नभसः पतनं चैव शैत्यमग्नेस्तथैव च ॥१५-९-१५ (९७१८६)
अश्रद्धेयमहं मन्ये विनाशं शार्ङ्गधन्वनः ।
न चेह स्थातुमिच्छामि लोके कृष्णविनाकृतः ॥१५-९-१६ (९७१८७)
इतः कष्टतरं चान्यच्छृणु तद्वै तपोधन ।
मनो मे दीर्यते येन चिन्तयानस्य वै मुहुः ॥१५-९-१७ (९७१८८)
पश्यतो वृष्णिदाराश्च मम ब्रह्मन्सहस्रशः ।
आभीरैरभिभूयाजौ हृताः पञ्चनदालयैः ॥१५-९-१८ (९७१८९)
धनुरादाय तत्राहं नाशकं तस्य पूरणे ।
यथापुरा च मे वीर्यं भुजयोर्न तथाऽभवत् ॥१५-९-१९ (९७१९०)
अस्त्राणि मे प्रनष्टानि विविधानि महामुने ।

शराश्च क्षयमापन्नाः क्षणेनैव समन्ततः ॥१५-९-२० (९७१९१)
पुरुषस्चाप्रमेयात्मा शङ्खचक्रगदाधरः ।
चतुर्भुजः पीतवासाः श्यामः पद्मदलेक्षणः ॥१५-९-२१ (९७१९२)
यश्च याति पुरस्तान्मे रथस्य सुमहाद्युतिः ।
प्रदहन्रिपुसैन्यानि न पश्याम्यहमद्य तम् ॥१५-९-२२ (९७१९३)
येन पूर्वं प्रदग्धानि शत्रुसैन्यानि तेजसा ।
शरैर्गाण्डीवनिर्मुक्तैरहं पश्चादशातयम् ॥१५-९-२३ (९७१९४)
तमपश्यन्विषीदामि घूर्णामीव च सत्तम ।
परिनिर्विण्णचेताश्च शान्तिं नोपलभेऽपि च ॥१५-९-२४ (९७१९५)
ग्देवकीनन्दनं देवं वासुदेवमजं प्रभुम्।'
विना जनार्दनं वीरं नाहं जीवितुमुत्सहे ॥ १५-९-२५ (९७१९६)
श्रुत्वैव हि गतं विष्णुं ममापि मुमुहुर्दिशः ।
प्रनष्टज्ञातिवीर्यस्य शून्यस्य परिधावतः ॥१५-९-२६ (९७१९७)
उपदेष्टुं मम श्रेयो भवानर्हति सत्तम ॥ १५-९-२७ (९७१९८)
व्यास उवाच।१५-९-२८क्ष् (८०२७)
ग्देवांशा देवभूतेन सम्भूतास्ते गतास्सह ।
धर्मव्यवस्थारक्षार्थं देवेन समुपेक्षिताः'॥१५-९-२८ (९७१९९)
ब्रह्मशापविनिर्दग्धा वृष्ण्यन्धकसमहारथाः ।
विनष्टाः कुरुशार्दूल न ताञ्शोचितुमर्हसि ॥१५-९-२९ (९७२००)
भवितव्यं तथा तच्च दिष्टमेतन्महात्मनाम् ।
उपेक्षितं च कृष्णेन शक्तेनापि व्यपोहितुम् ॥१५-९-९ (९७२०१)
त्रैलोक्यमपि गोविन्दः कृत्स्नं स्थावरजङ्गमम् ।
प्रसहेदन्यथा कर्तुं कुतः शापं महात्मनाम् ॥१५-९-३१ (९७२०२)
गस्त्रियश्च ताः पुरा शप्ताः प्रभासे कुपितेन वै ।
अष्टावक्रेण मुनिना तदर्थं त्वद्बलक्षयम् ॥' १५-९-३२ (९७२०३)
रथस्य पुरतो याति यः स चक्रगदाधरः ।
तव स्नेहात्पुराणर्षिर्वासुदेवश्चतुर्भुजः ॥१५-९-३३ (९७२०४)
कृत्वा भारावतरणं पृथिव्याः पृथुलोचनः ।
मोक्षयित्वा तनुं प्राप्तः कृष्णः स्वस्थानमुत्तमम् ॥१५-९-३४ (९७२०५)
त्वयाऽपीह महत्कर्म देवानां पुरुषर्षभ ।
कृतं भीमसहायेन यमाभ्यां च महाभुज ॥१५-९-३५ (९७२०६)
कृतकृत्यांश्च वो मन्ये संसिद्धान्कुरुपुङ्गव ।
गमनं प्राप्तकालं व इदं श्रेयस्करं विभो ॥१५-९-३६ (९७२०७)
बलं बुद्धिश्च तेजश्च प्रतिपत्तिश्च भारत ।
भवन्ति भवकालेषु विपद्यन्ते विपर्यये ॥१५-९-३७ (९७२०८)
कालमूलमिदं सर्वं जगद्बीजं धनंजय ।

काल एव समादत्ते पुनरेव यदृच्छया ॥ १५-९-३८ (९७२०९)
स एव बलवान्भूत्वा पुनर्भवति दुर्बलः ।
स एवेशश्च भूत्वेह परैराज्ञाप्यते पुनः ॥ १५-९-३९ (९७२१०)
कृतकृत्यानि चास्त्राणि गतान्यद्य यथागतम् ।
पुनरेष्यन्ति ते हस्तं यदा कालो भविष्यति ॥ १५-९-४० (९७२११)
कालो गन्तुं गतिं मुख्यां भवतामपि भारत ।
एतच्छ्रेयो हि वो मन्ये परमं भरतर्षभ ॥ १५-९-४१ (९७२१२)
वैशम्पायन उवाच। १५-९-४२क्ष् (८०२८)
एतद्वचनमाज्ञाय व्यासस्यामिततेजसः ।
अनुज्ञातो ययौ पार्थो नगरं नागसाह्वयम् ॥ १५-९-४२ (९७२१३)
प्रविश्य च पुरीं वीरः समासाद्य युधिष्ठिरम् ।
आचष्ट तद्यथावृत्तं वृष्ण्यन्धककुलं प्रति ॥ ॥ १५-९-४३ (९७२१४)

इति श्रीमन्महाभारते शतसाहस्र्यां संहितायां वैयासिक्यां
मौसलपर्वणि नवमोध्यायः। । ९ ॥ ॥ मौसलपर्व समाप्तम्
॥ -------- अस्यानन्तरं महाप्रस्थानिकं पर्व भविष्यति
तस्यायमाद्यः श्लोकः। जनमेजय उवाच। एवं वृष्ण्यन्धककुले श्रुत्वा
मौसलमाहवम्। पाण्डवाः किमकुर्वन्त तथा कृष्णे दिवं गते ॥ १
॥ इदं मौसलपर्व कुंभघोणस्थेन TI.Ar । कृष्णाचार्येण
टी। आर्। व्यासाचार्येण च मुम्बय्यां निर्णयसागरमुद्रायन्त्रे
मुद्रापितम्। शकाब्दाः १८३२ सन १९१०.
Mahabharata - Mausala Parva - Chapter Footnotes

१५-९-५ नखोदकं केशोदकं वस्त्रप्रान्तो दशा तदुदकं
कुम्भमुखोदकं च ।आवीरजा नारी रजस्वला तस्या रजःप्रस्रवकाले
दिनत्रयादर्वाक् अनुगमनं तस्यां मैथुनं ब्राह्मणस्य वधो युद्धे
पराजयश्चेति सप्तभिर्निमितैः पुरुषो भ्रष्टश्रीर्भवति। अपि
राजोपघातस्ते ब्राह्मणो वेति क ट पाठः ॥
१५-९-६ प्रभिन्नं पराजितं त्वां कदाचिदपि न जानामि ॥
१५-९-११ हतं मृतम् । मारितवन्त इत्यर्थः ॥
१५-९-१३ पञ्चशतं सहस्रं सहस्रगुणितं पञ्चलक्षामीत्यर्थः ॥
१५-९-१३ न केवलं हतं ताडितमपि तु निधनं प्राप्तमित्यर्थः ॥
१५-९-१८ पश्यतः अनादरे षष्ठी । मां पश्यन्तमनादृत्येत्यर्थः ॥
१५-९-३७ बुद्धिरुपस्थितकार्यावधारणम् । तेजः
प्रागल्भ्यम्। प्रतिपत्तिरनागतावेक्षणम्। भवन्ति
उत्पद्यन्ते। भवकालेषु ऐश्वर्यावाप्तिसमयेषु। विपर्यये

विनाशकाले। विपद्यन्ते विनश्यन्ति ॥
१५-९-३८ कालः ईश्वरः जगद्बीजं वियदादिपञ्चकं । समादत्ते संहरति यदा भूतानामपि संहारो भवति कियांस्तत्र भौतिकानां नाश इति तदर्थं शोकोनुचित इति भावः। य एव बलवान्स एव दुर्बलो भवत्येव विपर्ययोऽपि कालमूलो ज्ञेयः ॥
१५-९-४० पुनर्युगान्तरे ॥
१५-९-४१ मुख्यां गतिं स्वर्गं गन्तुम् एतत्प्रस्थानं श्रेयः ॥

Please send corrections to sanskrit@cheerful.com
Last updated October 14, 2013
http://sanskritdocuments.org